करोति खञ्जं पङ्गुं वा शरीरे सर्व्वतश्चरन् ।
वातेऽधिकेऽधिकन्तत्र शूलस्फुरणतोदनम् ।
शोथस्य रौक्ष्यकृष्णत्वश्यावताद्दृद्धिहानय: ॥
धमन्यङ्गुलिसन्धीनां सङ्कोचोऽङ्गग्रहोऽतिरुक् ।
शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तय: ।
रक्ते शोफोऽतिरुक्तोदस्ताम्रश्चिमिचिमायते ।
स्निग्धरूक्षै: शमं नैति कण्डूक्लेदसमन्वित: ॥
पित्ते विदाह: सम्मोह: स्वेदो मूर्च्छामद: स-
तृट् ।
स्पर्शाक्षमत्वं रुग्राग: शोथपाको भृशोष्मता ॥
कफे स्तैमित्यगुरुता सुप्तिस्निग्धत्वशीतता: ।
कण्डूर्मन्दा च रुग्द्वन्द्वसर्व्वलिङ्गञ्च सङ्करे ॥
एकदोषानुगं साध्यं नवं याप्यं द्विदोषजम् ।
त्रिदोषजं त्यजेत् स्रावि स्तब्धमर्ब्बुदकारि च ॥
रक्तमार्गं निहन्त्याशु शाखासन्धिषु मारुत: ।
निविश्यान्योऽन्यमावार्य्य वेदनाभिर्हरत्यसून् ॥”
इति वाभटे निदानस्थाने षोड़शेऽध्याये ।
“वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ।
अल्पाल्पं पालयन् वायुं यथादोषं यथाबलम् ॥
चिकित्सितं हितं पथ्यं प्रायश्चित्तं भिषग्जितम् ।
भेषजं शमनं शस्तं पर्य्यायै: स्मृतमौषधम् ।”
इति च वाभटे चिकित्सितस्थाने द्वाविंशतितमे-
ऽध्याये । अन्यद्वातरक्तशब्दे ज्ञातव्यम् ॥ *॥)
वातसह:, त्रि, ( वातं वातजनितरोगं सहते ।
सह+अच् । ) अल्पवायुयुक्त: । यथा,—
“वातासहो वातसहो वातूलो वातुलोऽपि च ।”
इति शब्दरत्नावली ॥
(वायुवेगसहनशील: । यथा, महाभारते । १ ।
१४२ । ५ ।
“ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ऊर्म्मिक्षमां दृढां कृत्वा कुन्तीमिदमुवाच च ॥”)
वातसारथि:, पुं, (वात: सारथि: सहायो यस्य ।)
अग्नि: । इति केचित् ॥
वातस्कन्ध:, पुं, (वातस्य स्कन्ध इव ।) आकाशस्य
भागविशेष: । यत्र वायुर्व्वहति । इति केचित् ॥
वातहा, [न्] त्रि, (वातं हन्तीति । हन्+क्विप् ।)
वातघ्न: । वायुनाशकौषधम् । इति वैद्यकम् ॥
वाताट:, पुं, ( वात इव अटति गच्छतीति । अट्
+अच् । ) सूर्य्याश्व: । इति त्रिकाण्डशेष: ॥
वातमृग: । इति शब्दरत्नावली ॥
वाताण्ड:, पुं, ( वातदूषितौ अण्डौ यस्मात् । )
मुष्करोगविशेष: । तस्य लक्षणं यथा,—
“कुपितो दूषयेद्वायु: शुक्रजा यस्य संवृत: ।
तस्य मुष्कवृद्धिको रोगो वाताण्डसंज्ञक: ।”
इति माधवकर: ॥
वाताद:, पुं, (वाताय वातनिवृत्तये अद्यते इति ।
अद्+घञ् । ) फलवृक्षविशेष: । बादाम इति
ख्यात: । तत्पर्य्याय: । वातवैरी २ नेत्रोपम-
फल: ३ वाताम्र: ४ । अस्य गुणा: । उष्णत्वम् ।
सुस्निग्धत्वम् । वातघ्नत्वम् । शुक्रकारित्वम् ।
गुरुत्वञ्च । अस्य मज्जगुणा: । मधुरत्वम् ।
वृष्यत्वम् । पित्तानिलापहत्वम् । स्निग्धत्वम् ।
उष्णत्वम् । कफकारित्वम् । रक्तपित्तविकारिणां
श्रेष्ठत्वञ्च । इति भावप्रकाश: ॥
वातापि:, पुं, असुरविशेष: । स च ह्रादस्य धमनौ
पत्न्यां जात: । अगस्त्येन भक्षित: । इति
श्रीभागवतमतम् ॥ कल्पान्तरे तु विप्रचित्ते:
सिंहिकायां जात: । यथा,—
“सिंहिकायामथोत्पन्ना विप्रचित्तेश्चतुर्द्दश ।
शंख: शवलनाभश्च अङ्ग: शाल्वस्तथैव च ॥
इल्वलो नमुचिश्चैव वातापी स्रृमरो जिक: ।
हरकल्प: कालनाभो भौमश्च नरकस्तथा ॥
राहुर्ज्येष्ठश्च तेषां वै चन्द्रसूर्य्यप्रमर्द्दन: ।
इत्येते सिंहिकापुत्त्रा देवैरपि दुरासदा: ॥”
इति वह्निपुराणे काश्यपीयवंश: ॥
अन्यच्च ।
“विप्रचित्ति: सैंहिकेयान् सिंहिकायामजी-
जनत् ।
हिरण्यकशिपोर्य्ये वै भागिनेयास्त्रयोदश ॥
व्यंस: शल्यश्च राजेन्द्रो नभो वातापिरेव च ।
इल्वलो नमुचिश्चैव खसृमश्चाञ्जनस्तथा ॥
नरक: कालनाभश्च सरमाणस्तथैव च ।
कल्पवीर्य्यश्च विख्यातो दनुवंशविवर्द्धन: ॥”
इति मात्स्ये ६ अध्याय: ॥
( मुनिवरोऽगस्त्यस्तु एनं असुरेश्वरं भक्षितं-
वान् । एतद्वृत्तान्तस्तु महाभारते वनपर्व्वणि
९९ अध्यायमारभ्य द्रष्टव्य: ॥ )
वातापिद्विट्, [ ष् ] पुं, ( वातापिं द्वेष्टीति ।
द्विष्+क्विप् । ) अगस्त्यमुनि: । इति हेम-
चन्द्र: । २ । ३६ ॥
वातापिसूदन: पुं, ( वातापिं सूदत इति । सूद्+
ल्यु: ।) अगस्त्य: । इति त्रिकाण्डशेष: ॥
वातापिहा [न्] पुं, ( वातापिं हन्तीति । हन्+
क्विप् । ) अगस्त्य: । इति त्रिकाण्डशेष: ॥
वातामोदा, स्त्री, (वातेन प्रसृत आमोदो यस्या: ।)
कस्तूरी । इति शब्दमाला ॥
वातायनं, क्ली, ( वातस्य अयनं गमनागमन-
मार्ग: ।) गवाक्ष: । इत्यमर: ॥ (यथा, आर्य्या-
सप्तशत्याम् । ५१० ।
“कोषागारस्य बहि: सखीषु चरणातिथौ
मयि प्रियया ।
प्रकटीकृत: प्रसादो दत्त्वा वातायने वदनम् ॥”)
तेन परबाधानिषेधो यथा,—
“परबाधां न कुर्व्वीत जलवातायनादिभि: ।
कारयित्वा तु कर्म्माणि कारुं पश्चात् न वञ्च-
येत् ॥”
इति कौर्म्मे उपविभागे १५ अध्याय: ॥
वातायन:, पुं, ( वातस्येव अयनं गतिर्यस्य । )
घोटक: । इति त्रिकाण्डशेष: ।
वातायु:, पुं, ( वातमयते इति । अय+बाहु-
लकात् उण् । ) हरिण: । इत्यमर: ॥
वातारि:, पुं, ( वातस्य वातरोगस्य अरि: । )
एरण्डवृक्ष: । इति शब्दरत्नावली ॥ ( अस्य
पर्य्यायो यथा,—
“शुक्लएरण्ड आमण्डश्चित्रोगन्धर्व्वहस्तक: ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डक: ॥
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते । १ ।
रक्तोऽपरो रुवूक: स्याद्रुवूको रुवूस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रक: ॥”२॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।)
शतमूली । इति शब्दचन्द्रिका ॥ सुत्रदात्री ।
शेफालिका । यवानी । भार्गी । स्नुही ।
विड़ङ्ग: । सूरण: । भल्लातक: । जतुका । इति
राजनिर्घण्ट: ॥
वाताली, स्त्री, ( वातस्य आली यत्र । ) वात्या ।
इति त्रिकाण्डशेष: ॥
वाताश्व:, पुं, ( वात इव शीघ्रगोऽश्व: । ) कुली-
नाश्व: । तत्पर्य्याय: । हयोत्तम: २ जात्य: ३
आजानेय: ४ । इति त्रिकाण्डशेष: ॥ ( यथा,
कथासरित्सागरे । ६६ । १७४ ।
“तदिमं मां विजानीहि लक्ष्मीसेनं वरानने ।
आनीतमिह वाताश्वेनाहृत्याखेटनिर्गतम् ।”)
वातासह:, त्रि, ( वातं वातजनितरोगं आसहते
इति । आ+सह+अच् । ) वातुल: । इति
शब्दरत्नावली ॥
वाति:, पुं, (वाति गच्छतीति । वा+“वातेर्नित् ।)
उणा० ५ । ६ । इति अति: ।) वायु: । यथा,
“वातिर्वायुर्मरुद्वात: श्वसन: पवनोऽनिल: ।”
इत्यमरटीकायां भरतधृतसाहसाङ्क: ॥
सूर्य्य: । चन्द्र: । यथा । वातिरादित्यसोमयो: ।
इति रभस: ॥
वातिक:, पुं, ( वातादागत: । वात+ठञ् । )
वायुजव्याधि: । यथा,—
“वातिको वातजो व्याधि: पैत्तिक: पित्तसम्भव: ।
श्लैष्मिक: श्लेष्मसंभूत: समूह: सान्निपातिक: ॥”
इति राजनिर्घण्ट: ॥
( क्ली, वातस्य शमनं कोपनं वा । “वातपित्त-
श्लेष्मभ्य: शमनकोपनयोरुपसंख्यानम् ।”५ । १ ।
३८ । इत्यस्य वार्त्ति० ठञ् । वातिकरोगाक्रान्ते
वाचाले, त्रि । यथा, महाभारते ।३।२५६।३।
“अपरे त्वब्रुवंस्तत्र वातिकास्तं महीपतिम् ।
युधिष्ठिरस्य यज्ञेन न समो ह्येष ते क्रतु: ।”)
वातिग:, पुं, ( वातिं वायुं गच्छतीति । गम्+
ड: । ) भण्टाकी । धातुवादिनि, त्रि । इति
मेदिनी । गे, ४८ ॥
वातिगम:, पुं, (वातिं वायुं गमयतीति प्रापयति ।
गमि+अच् । ) वार्त्ताकु: । इति शब्दरत्ना-
वली ॥
वातिङ्गन:, पुं, वार्त्ताकु: । इति त्रिकाण्डशेष: ॥
वातीयं, क्ली, (वाताय वातनिवृत्तये हित: । वात
+छ: । ) काञ्जिकम् । इति शब्दचन्द्रिका ॥
वातुल:, पुं, वात्या । इत्यमरटीकायां भरत: ॥
वातुल:, त्रि, वातविकारासह: । उन्मत्त: । इत्य-
मरटीकायां भरत: ॥
वातुलि:, स्त्री, तरुतूलिका । इति हारावली ॥
बादुड़ इति भाषा ॥